# 2

1075CH02

# पत्रलेखनम्

## (क) अनौपचारिकम् पत्रम्

**1. चोरितस्य स्यूतस्य प्राथमिक-सूचनार्थम् आरक्ष्यधिकारिणं प्रति पत्रं लिखत।**

आरक्ष्यधिकारि-महोदय!

लाजपतनगर-क्षेत्रम्

नवदेहली

विषय:— चोरितस्य स्यूतस्य प्राथमिक-सूचना।

श्रीमन्,

अनेन पत्रेण अहं भवते एतत् सूचयामि यत् ह्य: प्रात: एकादश-वादने रेलमैट्रोयानेन विश्वविद्यालयात् अहं लाजपतनगरम् अगच्छम्। मार्गे मम स्यूतं चोरितम् अभवत्। यस्मिन् द्विसहस्रं रूप्यकाणि, कार्यालयस्य परिचय-पत्रं, मैट्रोचिटिकापत्रं मम आधार-परिचयपत्रं चासन्। स्यूतस्य वर्ण: कृष्ण: आसीत्। अहं प्रार्थये यत् यथाशीघ्रं मम स्यूतम् अन्वेष्य मां कृतार्थं करोतु भवान्।

सधन्यवादम्

निवेदक:

अजय:

निवासस्थानम् – ..............................

दूरभाष-संख्या – ..............................

दिनाङ्क:–..............................

© NCERT not to be republished

**2. चोरितायाः घटिकायाः प्राथमिक-सूचनार्थम् आरक्ष्यधिकारिणं प्रति पत्रं लिखत।**

..............................................
..............................................
..............................................
..............................................
..............................................

..........................................................................................................................................................................................

© NCERT not to be republished



Reprint 2025-26

## (ख) औपचारिकम् पत्रम्

**1. विज्ञानविषयं प्राप्तुं प्राधानाचार्यं प्रति आवेदनपत्रम्।**

सेवायाम्
प्रधानाचार्यमहोदय!
मीमांसाविद्यालय:, नवदेहली

विषय:- एकादशकक्षायां विज्ञानविषयग्रहणार्थं विशेषानुमतये निवेदनम्।

महोदय,

सविनयं निवेद्यते यदहमस्मिन् विद्यालये प्रथमकक्षात: पठामि। प्रतिवर्षमहम् उत्तमान् अङ्कान् प्राप्य कक्षायां प्रथमस्थानमेव अधिगच्छामि स्म। परमस्मिन् वर्षे परीक्षामध्ये एवाहम् अकस्मात् ज्वरग्रस्त: अभवम्। विज्ञानविषयस्य तु परीक्षाऽपि मया चिकित्सालयात् एव परीक्षाकेन्द्रं प्राप्य प्रदत्ता। फलत: मया आशानुकूल: परीक्षापरिणाम: न प्राप्त:। विद्यालयनियमानुसारं विज्ञानविषय-ग्रहणाय प्रतिशतं केवलम् एकस्य एव अङ्कस्य न्यूनता अस्ति।

महोदय! शैशवादेव मम हार्दिकी इच्छा जीवविज्ञाने शोधं कृत्वा वैज्ञानिक: भवितुमासीत्। परं यदि अहं विज्ञानविषये प्रवेशमेव प्राप्तुमसमर्थ: भविष्यामि तदा कथमहं स्वकीयं स्वप्नं सार्थकारं करिष्यामि। अत: मम करबद्ध: अनुरोध: अस्ति। यन्मह्यं विज्ञानविषयं पठितुं भवान् अनुमतिं प्रयच्छतु। एतदर्थम् अहं पुन: परीक्षणाय अपि सज्ज: अस्मि।

आशासे यत् भवान् मम स्थितिमवगत्य मम विशेषानुरोधं स्वीकरिष्यति।

कृपाकाङ्क्षी
भवदाज्ञाकारी शिष्य:

**2. अध्ययनं प्रति मातरं समाश्वासयितुं पुत्र्या लिखितं पत्रं मञ्जूषायां प्रदत्तपदै: पूरयित्वा पुन: लिखत—**

| |
|---|
| कुशलम्, प्रतियोगिता:, कुशलिनी, परिणाम:, चिन्तिता, मतिम्, आनन्देन, करणीया, खेलप्रतियोगितासु, काल: |

परीक्षाभवनत:
दिनाङ्क:..............................

पूज्यमातृचरणा:,
प्रणतीनां शतम्।

अत्र अहं ..............................। आशासे भवती पितृमहोदय: च .............................. स्त:। मात:! अहं जानामि यद् भवती मम अर्धवार्षिक-परीक्षापरिणामकारणात् .............................. अस्ति।



© NCERT not to be republished

Reprint 2025-26

अत्र चिन्ता न ..............................। प्रथमसत्रे तु अहं .................. रता आसम्। पठनाय तु ......................................... एव न आसीत् परम् अधुना तु सर्वाः ................................................ समाप्ताः। अद्यारभ्य अहं केवलं पठने एव ............................................ विधास्यामि। आशासे वार्षिकपरीक्षायां मम ................................................. भवताम् आशानुकूलः भविष्यति। शेषं सर्वं ..................................... भवत्याः चरणयोः प्रणामाः

भवत्याः पुत्री

सुकन्या

3. **जलसंरक्षणस्य महत्त्वं वर्णयन्तः मित्रं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा पुनः लिखत—**

| |
|---|
| देशस्य, प्रयतमानाः, अपव्ययम्, विचारयति, जागरूकता, प्रयासः, जानीमः, जीवनम्, सह, अस्तु |

छात्रावासतः

दिनाङ्कः.............................

प्रिय मित्र!

सप्रेम नमो नमः,

अत्र कुशलं तत्र ..........................। भवतः पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि यत् भवान् मित्रैः ........................... जलसंरक्षणप्रचारकार्ये रतोऽस्ति। एषः तु उत्तमः ..........................अस्ति। वयं सर्वे एव ............................यत् जीवने जलस्य महत्त्वं तु अतुलनीयम्। जलम् एव ........................... इति वयं सर्वे जानीमः परं पुनरपि वयम् अस्य .............................. कुर्मः। अनेन आगामिकाले यद् भीषणं जलसङ्कटं भवेत् इति कोऽपि न ..........................। जलसंरक्षणार्थं ...........................अनिवार्या एव। यदि जनाः अत्र ध्यानं न दास्यन्ति तदा अस्माकं ........................... स्थितिरपि अफ्रीकादेशवत् भविष्यति। यथा ते जलबिन्दुप्राप्त्यर्थं ........................... सन्ति तथा एव अस्माकं देशस्य अपि स्थितिः भविष्यति। अतः जलसंरक्षणार्थं जागरूकता अनिवार्या। शेषं सर्वं कुशलम्। पितृभ्यां चरणयोः मम् वन्दन।

भवतः मित्रम्

उमेशः

**4. स्वस्थभोजनस्य महत्त्वं वर्णयन्त्याः अग्रजायाः अनुजं प्रति पत्रम्।**

प्रिय अमित!

सप्रेम नमो नमः।

माता लिखितं पत्रं प्राप्तम्। तेन पत्रेण मया ज्ञातं यत् भवान् सन्तुलितं भोजनं न सेवते, प्रतिदिनं च 'चाऊमीन-बर्गर' इति खादति। ईदृशं भोजनं स्वास्थ्याय सम्यक् न अस्ति। कदाचित् तु अस्य सेवनं कर्त्तुं शक्यते परं प्रतिदिनं त्वरितभोजनस्य सेवनं स्वास्थ्याय हानिकरम्।

स्वास्थ्याय तु सन्तुलितभोजनं ग्रहीतव्यम् एव यतः 'स्वस्थशरीरे एव स्वस्थमनसः वासः' भवति अतः भवान् त्वरितभोजनस्य सेवनं मा करोतु। स्वास्थ्यवर्धकभोजनमेव खादतु। अनेन भवान् कदापि रुग्णः न भविष्यति। भवान् स्वस्वास्थ्यविषये जागरूकः तिष्ठतु इति मे अनुरोधः।

भवतः अग्रजा

अमिता

**5. सन्तुलितभोजनमेव सेवनीयम् इति वर्णयतः अग्रजस्य अनुजां प्रति पत्रं लिखत—**

परीक्षाभवनतः

दिनाङ्कः.........................

..................................................

..................................................

........................................................................................................................................................................

........................................................................................................................................................................

........................................................................................................................................................................

........................................................................................................................................................................

........................................................................................................................................................................

........................................................................................................................................................................

........................................................................................................................................................................

........................................................................................................................................................................

........................................................................................................................................................................

........................................................................................................................................................................

भवतः अग्रजः

.................................................



© NCERT not to be republished

**6. प्रतियोगिपरीक्षार्थं सन्नद्धीकरणाय आरम्भत: एव सामान्यज्ञानस्य अभ्यास: करणीय: इति उपदिशत: पितु: पुत्रं प्रति पत्रम्।**

जयपुरत:
दिनाङ्क:..........................

प्रिय पुत्र अविनाश!
शुभाशिषो लसन्तु।

आशासे त्वं सकुशल: स्वाध्याये रत: असि। पुत्र! अहं जानामि परीक्षायां तव प्रस्तुति: शोभना भवति। त्वं प्रतिवर्षं कक्षायां प्रथमं स्थानं प्राप्नोषि इति अहं जानामि। ग्रीष्मावकाशे त्वं कथितवान् यत् तव लक्ष्यं प्रतियोगिपरीक्षामुत्तीर्य सङ्घलोकसेवा-आयोगक्षेत्रे सेवाप्रदानम् अस्ति। पुत्र! एतल्लक्ष्यं प्राप्तुं बाल्यकालादेव सामान्यज्ञानस्य अध्ययनं करणीयम्। अत एव विषयस्य अभ्यासेन समम् एकहोरापर्यन्तं सामान्यज्ञानं वर्धयितुं प्रतिदिनं सामाचारपत्रं पठ तदा यदि अधुनात: एतल्लक्ष्यं प्राप्तुं नियमितम् अध्ययनं करिष्यसि नूनमेव साफल्यं लप्स्यसे। यदि काऽपि सहायता अपेक्षिता तर्हि अहं करिष्यामि।

तव जनक:
आशीषकुमार:

**7. जीवने सफलतां लब्धुं परिश्रमस्य महत्त्वं वर्णयन्त्या: मातु: पुत्रीं प्रति पत्रम् पूरयत—**

कानपुरत:
दिनाङ्क:..........................

प्रिय पुत्रि!
..................................................

..................................................................................................................
..................................................................................................................
..................................................................................................................
..................................................................................................................
..................................................................................................................
..................................................................................................................
..................................................................................................................

तव जननी
सुधा

**8. स्वदेशस्य संस्कृतिं वर्णयन्तीं विदेशिनीं सखीं प्रति पत्रं लिखत—**



© NCERT not to be republished

..................................................

..................................................

..................................................

..................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................

..................................................

9. **'पुत्रीं रक्ष पुत्रीं पाठय' इति अभियानं कथं सार्थकं भविष्यतीति स्वविचारं प्रकटयन्त: मित्रं प्रति पत्रं लिखत—**

..................................................

..................................................

..................................................

..................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................................................................................................................

..................................................

..................................................

© NCERT not to be republished



Reprint 2025-26